# संस्कृतदिवसस्य प्रतिवेदनम्

31/08/2023, श्रावणपूर्णिमा, वि. संवत् २०८०



संस्कृतोत्सवाङ्गतया नवदेहलीस्थे मुख्यालये विशिष्टः कार्यक्रमः समायोजितः। मुख्यातिथिरूपेण भारतीय-दार्शनिक-अनुसन्धान -परिषदः सदस्यसचिवः **प्रो. सच्चिदानन्दमिश्र**वर्याः समागताः। महोदयैः उक्तं यत्- सामयिके युगे शास्त्रोक्तयुक्तीनां विभिन्नेषु क्षेत्रेषु अनुप्रयोगः कर्तव्यः वर्तते। पाश्चात्याः स्वल्पमपि ज्ञानं महता वैभवेन विस्तरेण च प्रतिपादयन्ति। भारतीयशास्त्रज्ञाः महान्तमपि विषयं सूत्ररूपेण अल्पाक्षरैश्च वदन्ति। एवमेव पाश्चात्याः महान्तं परिश्रमं विधाय अल्पज्ञानं विन्दन्ति। भारतीयास्तु अल्पेनापि श्रमेण महत् ज्ञानं विन्दन्ति। किञ्च 'भारतीयाः ज्ञानार्जनाय संस्कृतभाषामेव प्रयुञ्जते। अतः महर्षिणा पाणिनिना संस्कृताभाषायाः समाराधनं संस्कृतदिवसे विशेषतया करणीयम् इति। वयं सरलमानकसंस्कृतेन सह शास्त्रीयां शैलीम् अधिगन्तुं प्रयासं कुर्मः। मौलिकं शोधकार्यं करिष्यामः। सर्वेषां मङ्गलं भवतु इति।

कुलपतयः वरखेडीवर्याः प्रवासरताः सन्तोऽपि **‘संस्कृतं संस्कृतेर्मूलं विद्यामूलं च संस्कृतम्’** इत्येनम् अभिप्रायं श्लोकसन्देशरूपेण प्रेषितवन्तः। कार्यक्रमाध्यक्षाः प्रो.सर्वनारायणझावर्याः संस्कृतदिवसे संस्कृतेन संस्कृतस्य च कार्यं कर्तुं सर्वैः सङ्कल्पः कर्तव्यः इत्यवोचन्। सरलेन सह गभीरमपि शास्त्रम् अध्येतुं सर्वैः प्रयासः कर्तव्यः इति ते सोदाहरणं न्यरूपयन्। प्रास्ताविकभाषणं शैक्षिकानुभागस्य अधिष्ठातृभिः प्रो. बनमालीबिश्वालवर्यैः श्लोकवाक्यैः कृतम्। कुलसचिवाः प्रो. रणजितकुमारबर्मनवर्याः समुपस्थिताः आसन्। प्रो. मधुकेश्वरभट्टवर्याः स्वागतं व्याहरन्। डा. गणेश ति. पण्डितवर्याः विशिष्टकार्यक्रमस्य सञ्चालनमकुर्वन्। अन्तर्जालमुखेन सर्वपरिसरीयाः सम्बद्धादर्शविद्यालयीयाः च गुरुशिष्याधिकारिणः सम्पृक्ताः आसन्। मुख्यालये नवनियुक्ताः प्राध्यापकाः मुख्यालयाधिकारिणः कर्मचारिणश्च विशिष्टकार्यक्रमस्य प्रत्यक्षसाक्षिणो अभवन्। मुख्यालये प्रतिष्ठापितस्य नवशोधकेन्द्रस्य शोधच्छात्राः कार्यक्रमस्य सर्वविधसिद्धतां कारं कारं सर्वेषां प्रीतिपात्राणि समभवन्। शान्तिमन्त्रेण सह विशिष्टकार्यक्रमः सुसम्पन्नः।




प्रतिवेदननिर्माणम् -

डा. गणेश ति. पण्डितः

उपनिदेशकः

प्रकाशनानुभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली